**परः सन्निकर्षः संहिता १/४/१०९**

संहितासंज्ञाविधायकं सूत्रमिदं 'लधुसिद्धान्तकौमुदी' इति व्याकरणग्रन्थस्य संज्ञाप्रकरणे अन्तर्गतम्। सूत्रेऽस्मिन् परः प्रथमान्तं, सन्निकर्षः प्रथमान्तं, संहिता च प्रथमान्तं पदम्। अतस्त्रिपदमिदं सूत्रम्। आचार्यवरदराजेन अस्य सूत्रस्य अर्थः कृतः- 'वर्णानामतिशयितः सन्निधिः संहितासंज्ञः स्यात्'। परः अतिशयितः, सन्निकर्षः सामीप्यम् इत्यर्थः। अतो वर्णानाम् अतिशयितः प्रत्यासत्तिरेव संहितासंज्ञको भवति।

यथा-'गण+ईशः'=गणेशः। दृष्टान्तेऽस्मिन् अर्धमात्राकालाधिकाभावात् पूर्वपरयोः अकार-ईकारयोरेको गुणादेशे गणेशः इति रूपं सिद्धम्। एवमेव यद्यपि, विद्यालयम्, स्वागतम् इत्यादयः।

**अच्सन्धिः**

**अकः सवर्णे दीर्घः ६/१/१०१**

सवर्णदीर्घसन्धिविधायकं विधिसूत्रमिदं 'लधुसिद्धान्तकौमुदी' इति व्याकरणग्रन्थस्य अच्सन्धिप्रकरणे अन्तर्गतम्। सूत्रेऽस्मिन् अकः पञ्चम्यन्तं, सवर्णे सप्तम्यन्तं, दीर्घश्च प्रथमान्तं पदम्। अतस्त्रिपदमिदं सूत्रम्। आचार्यवरदराजेन अस्य सूत्रस्य अर्थः कृतः- 'अकः सवर्णेऽचि परे पूर्वपरयोर्दीर्घ एकादेशः स्यात्' इति। अत्र 'अक्' इति प्रत्याहारः। अक्-प्रत्याहारेण अइउऋलृवर्णा गृह्यन्ते। अतः 'सवर्णे' किम् ? जिज्ञासायां वक्तुं शक्यते यत्- तुल्यौ आस्यप्रयत्नौ यस्य वर्णस्य ते वर्णाः समानजातीयं प्रति सवर्णसंज्ञकाः भवेयुः। अत एव संहितायाम् 'अक्' इत्यस्मात् प्रत्याहारस्थितवर्णात् सवर्णेऽचि परे सति पूर्वपरयोः स्थाने दीर्घः एकादेशो भवति। यथा 'दैत्य+अरिः' इति अवस्थायां 'परः सन्निकर्षः संहिता' इत्यनेन सूत्रेण संहितासंज्ञायां 'तस्मिन्निति निर्दिष्टे पूर्वस्य' 'स्थानेऽन्तरतमः' इतिसूत्रद्वयसहकारेण 'अकः सवर्णे दीर्धः' इत्यनेन सूत्रेण सवर्णदीर्घैकादेशे 'दैत्य्+आ+अरिः' इति जाते वर्णसम्मेलने 'दैत्यारिः' इति दृष्टान्तं सिद्धं भवति।

**इको यणचि ६/१/७७**

यण्-सन्धिविधायकं विधिसूत्रमिदं 'लधुसिद्धान्तकौमुदी' इति व्याकरणग्रन्थस्य अच्सन्धिप्रकरणे अन्तर्गतम्। सूत्रेऽस्मिन् इकः षष्ठ्यन्तम्, यण् प्रथमान्तं अचि च सप्तम्यन्तं पदम्। अतस्त्रिपदमिदं सूत्रम्। आचार्येण वरदराजेन सूत्रस्यास्य अर्थः कृतः- 'इकः स्थाने यण् स्यादचि

संहितायां विषये’ इति। इक्-यण्शब्दाभ्यां प्रत्याहारद्वयं गृह्यते। इक्-प्रत्याहारेण इउऋलृवर्णा, यण्-प्रत्याहारेण च यवरलवर्णा गृहिता भवेयुः। अचिपदेन सर्वेषां स्वरवर्णानां ग्रहणं भवति। अत एव स्वरवर्णे परे सति ‘इक्’ इत्यस्य स्थाने यथाक्रमेण यणादेशो भवति, अर्थाद् इकारस्य स्थाने यकारः, उकारस्य स्थाने वकारः, ऋकारस्य स्थाने रकारः, लृकारस्य स्थाने लकारश्च भवति। यथा ‘सुधी+उपास्यः’ इति अवस्थायां ‘परः सन्निकर्षः संहिता’ इत्यनेन सूत्रेण संहितासंज्ञायां ‘तस्मिन्निति निर्दिष्टे पूर्वस्य’ ‘स्थानेऽन्तरतमः’ इतिसूत्रद्वयसहकारेण ‘इको यणचि’ इत्यनेन सूत्रेण ईकारस्य यणादेशे य्-कारे ‘सुध्+य्+उपास्यः’ इति जाते वर्णसम्मेलने ‘सुध्युपास्यः’ इति दृष्टान्तं सिद्धं भवति।

**आद् गुणः**

गुणसन्धिविधायकं विधिसूत्रमिदं ‘लधुसिद्धान्तकौमुदी’ इति व्याकरणग्रन्थस्य अच्सन्धिप्रकरणे अन्तर्गतम्। सूत्रेऽस्मिन् ‘आत्’ पञ्चम्यन्तम्, ‘गुणः’ च प्रथमान्तं पदम्। अतो द्विपदमिदं सूत्रम्। ‘एकः पूर्वपरयोः’ इति सूत्रस्याधिकारे पठिते सूत्रेऽस्मिन् ‘इको यणचि’ इत्यस्मात् सूत्राद् ‘अचि’ इत्यस्य अनुवृत्तिः भवति। आचार्येण वरदराजेन सूत्रस्यास्य अर्थः कृतः- ‘अवर्णादचि परे पूर्वपरयोरेको गुण आदेशः स्यात्’ इति। अत एव यदि अवर्णात् स्वरवर्णे परे सति तर्हि तयोः द्वयोः पूर्वपरयोः स्थाने एको गुणादेशो भवेदिति। यथा ‘उप+इन्द्रः’ इति अवस्थायां ‘परः सन्निकर्षः संहिता’ इत्यनेन सूत्रेण संहितासंज्ञायां ‘तस्मिन्निति निर्दिष्टे पूर्वस्य’ ‘स्थानेऽन्तरतमः’ इतिसूत्रद्वयसहकारेण ‘आद् गुणः’ इत्यनेन सूत्रेण पूर्वपरयोः स्थाने एकगुणादेशे ‘उप्+ए+न्द्रः’ इति जाते वर्णसम्मेलने ‘उपेन्द्रः’ इति दृष्टान्तं सिद्धं भवति।